# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ५७

प्रस्थाप्य तद्बलं सर्वं मासमात्रोषितः पथि ।
एक एवाशु शत्रुघ्नो जगाम त्वरितस्तदा ॥ १ ॥

द्विरात्रमन्तरे शूर उष्य राघवनन्दनः ।
वाल्मीकेराश्रमं पुण्यमगच्छद्वासमुत्तमम् ॥ २ ॥

सोऽभिवाद्य महात्मानं वाल्मीकिं मुनिसत्तमम् ।
कृताञ्जलिरथो भूत्वा वाक्यमेतदुवाच ह ॥ ३ ॥

भगवन्वस्तुमिच्छामि गुरोः कृत्यादिहागतः ।
श्वः प्रभाते गमिष्यामि प्रतीचीं वारुणीं दिशम् ॥ ४ ॥

शत्रुघ्नस्य वचः श्रुत्वा प्रहस्य मुनिपुङ्गवः ।
प्रत्युवच महात्मानं स्वागतं ते महायशः ॥ ५ ॥

स्वमाश्रममिदं सौम्य राघवाणां कुलस्य ह ।
आसनं पाद्यमर्घ्यं च निर्विशङ्कः प्रतीच्छ मे ॥ ६ ॥

प्रतिगृह्य ततः पूजां फलमूलं च भोजनम् ।
भक्षयामास काकुत्स्थस्तृप्तिं च परमां गतः ॥ ७ ॥

स तु भुक्त्वा महाबाहुर्महर्षिं तमुवाच ह ।
पूर्वं यज्ञविभूतीयं कस्याश्रमसमीपतः ॥ ८ ॥

तस्य तद्भाषितं श्रुत्वा वाल्मीकिर्वाक्यमब्रवीत् ।
शत्रुघ्न शृणु यस्येदं बभूवायतनं पुरा ॥ ९ ॥

युष्माकं पूर्वको राजा सुदासस्य महात्मनः ।
पुत्रो मित्रसहो नाम वीर्यवानतिधार्मिकः ॥ १० ॥

स बाल एव सौदासो मृगयाम् उपचक्रमे ।
चञ्चूर्यमाणं ददृशे स शूरो राक्षसद्वयम् ॥ ११ ॥

शार्दूलरूपिणौ घोरौ मृगान्बहुसहस्रशः ।
भक्षयाणावसन्तुष्टौ पर्याप्तिं च न जग्मतुः ॥ १२ ॥

स तु तौ राक्षसौ दृष्ट्वा निर्मृगं च वनं कृतम् ।
क्रोधेन महताविष्टो जघानैकं महेषुणा ॥ १३ ॥

विनिपात्य तमेकं तु सौदासः पुरुषर्षभः ।
विज्वरो विगतामर्षो हतं रक्षोऽभ्यवैक्षत ॥ १४ ॥

निरीक्षमाणं तं दृष्ट्वा सहायस्तस्य रक्षसः ।
सन्तापमकरोद्घोरं सौदासं चेदमब्रवीत् ॥ १५ ॥

यस्मादनपराद्धं त्वं सहायं मम जघ्निवान् ।
तस्मात्तवापु पापिष्ठ प्रदास्यामि प्रतिक्रियाम् ॥ १६ ॥

एवमुक्त्वा तु तं रक्षस्तत्रैवान्तरधीयत ।
कालपर्याय योगेन राजा मित्रसहोऽभवत् ॥ १७ ॥

राजापि यजते यज्ञं तस्याश्रमसमीपतः ।
अश्वमेधं महायज्ञं तं वसिष्ठोऽभ्यपालयत् ॥ १८ ॥

तत्र यज्ञो महानासीद्बहुवर्ष गणायुतान् ।
समृद्धः परया लक्ष्म्या देवयज्ञसमोऽभवत् ॥ १९ ॥

अथावसाने यज्ञस्य पूर्ववैरमनुस्मरन् ।
वसिष्ठरूपी राजानमिति होवाच राक्षसः ॥ २० ॥

अद्य यज्ञावसानान्ते सामिषं भोजनं मम ।
दीयतामिति शीघ्रं वै नात्र कार्या विचारणा ॥ २१ ॥

तच्छ्रुत्वा व्याहृतं वाक्यं रक्षसा कामरूपिणा ।
भक्षसंस्कारकुशलमुवाच पृथिवीपतिः ॥ २२ ॥

हविष्यं सामिषं स्वादु यथा भवति भोजनम् ।
तथा कुरुष्व शीघ्रं वै परितुष्येद्यथा गुरुः ॥ २३ ॥

शासनात्पार्थिवेन्द्रस्य सूदः सम्भ्रान्तमानसः ।
स च रक्षः पुनस्तत्र सूदवेषमथाकरोत् ॥ २४ ॥

स मानुषमथो मांसं पार्थिवाय न्यवेदयत् ।
इदं स्वादुहविष्यं च सामिषं चान्नमाहृतम् ॥ २५ ॥

स भोजनं वसिष्ठाय पत्न्या सार्धमुपाहरत् ।

मदयन्त्या नरव्याघ्र सामिषं रक्षसा हृतम् ॥ २६॥

ज्ञात्वा तदामिषं विप्रो मानुषं भोजनाहृतम् ।
क्रोधेन महताविष्टो व्याहर्तुमुपचक्रमे ॥ २७॥

यस्मात्त्वं भोजनं राजन्ममैतद्दातुमिच्छसि ।
तस्माद्भोजनमेतत्ते भविष्यति न संशयः ॥ २८॥

स राजा सह पत्न्या वै प्रणिपत्य मुहुर्मुहुः ।
पुनर्वसिष्ठं प्रोवाच यदुक्तं ब्रह्मरूपिणा ॥ २९॥

तच्छ्रुता पार्थिवेन्द्रस्य रक्षसा विकृतं च तत् ।
पुनः प्रोवाच राजानं वसिष्ठः पुरुषर्षभम् ॥ ३०॥

मया रोषपरीतेन यदिदं व्याहृतं वचः ।
नैतच्छक्यं वृथा कर्तुं प्रदास्यामि च ते वरम् ॥ ३१॥

कालो द्वादश वर्षाणि शापस्यास्य भविष्यति ।
मत्प्रसादाच्च राजेन्द्र अतीतं न स्मरिष्यसि ॥ ३२॥

एवं स राजा तं शापमुपभुज्यारिमर्दनः ।
प्रतिलेभे पुना राज्यं प्रजाश्चैवान्वपालयत् ॥ ३३॥

तस्य कल्माषपादस्य यज्ञस्यायतनं शुभम् ।
आश्रमस्य समीपेऽस्मिन्यस्मिन्पृच्छसि राघव ॥ ३४॥

तस्य तां पार्थिवेन्द्रस्य कथां श्रुत्वा सुदारुणम् ।
विवेश पर्णशालायां महर्षिमभिवाद्य च ॥ ३५॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com